मरीच्यादि षण्महर्षुल वंशकीर्तनम्
वैशंपायन

हन्त ते कथयिष्यामि नमस्कृत्य स्वयम्भुवे।
सुरादीनामहं सम्यग् लोकानां प्रभवाप्यहम्॥ 1

ब्रह्मणो मनसाःपुत्रा विदिता षण्महर्षयः।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहःक्रतुः॥ 2

मरीचेःकश्यपःपुत्रः कश्यपात् तु इमाःप्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश॥ 3

अदितिर्दितिर्दनुःकाला दनायुः सिंहिका तथा।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः॥ 4

कदृश्च मनुजव्याघ्र दक्षकन्यैव भारत।
एतासां वीर्यसम्पन्नं पुत्रपौत्रमनन्तकम॥ 5

आदित्यं द्वादशादित्याः सम्भूता भुवनेश्वराः।
ये राजन् नामतस्तांस्ते कीर्तयिष्यामि भारतं॥ 6

धाता मित्रोर्यमाशक्रो वरुणस्त्वंश एव च।
भगो विवश्वान् पूषा च सविता दशमस्तथा॥ 7

एकादशस्तथा स्त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्वेषां आदित्यानां गुणाधिकः॥ 8

एक एव दितेः पुत्रो हिरण्यकशिपुःस्मृतः।
नाम्ना ख्यातस्तु तस्येमे पञ्चपुत्रा महात्मनः.॥ 9

प्रह्लादःपूर्वजस्तेषां संह्लादस्तदनन्तरम्.।
अनुह्लादस्तृतीयोऽभूत् तस्माच्च शिबिबाष्कलौ॥10

प्रह्लादस्य त्रयःपुत्राः ख्याताःसर्वत्र भारत।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत॥11

विरोचनस्य पुत्रोऽभूद् बलिरेकःप्रतापवान्।
बलेश्च प्रतिथःपुत्रो बाणोनाम महासुरः॥ 12

रुद्रस्यानुचरःश्रीमान् महाकालेति यं विदुः।
चतुस्त्रिंशद् दनोःपुत्राः ख्याताः सर्वत्र भारत ॥13

तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः।
शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः॥14

असिलोमा च केशी च दुर्जयश्चैव दानवः।
अयःशिरा अश्वशिरा अश्वशंकुश्च वीर्यवान्॥ 15

तथा गगनमूर्धा च वेगवान् केतुमांश्च सः।
स्वर्भानुरश्वोश्वपतिर्वृषपर्वाजकस्तथा॥ 16

अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः।
इषुपादेकचक्रश्च विरूपाक्षो हराहरौ ॥17

निचन्द्रश्च निकुम्भश्च कुपटःकपटस्तथा।
शरभः शलभश्चैव सूर्याचन्द्रमसौ तथा ॥18

एते ख्यातार्दनोर्वंशे दानवाःपरिकीर्तिताः।
अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ स्मृतौ॥ 19

अन्यौ दानवमुख्यानां सूर्याचन्द्रमसौ तथा ।
इमे च वंशाःप्रथिताः सत्त्ववन्तोमहाबलाः॥ 20

दनुपुत्रा महाराज दश दानववंशजाः।
एकाक्षो मृतपा वीरः प्रलम्बनरकावपि॥ 21

वातापी शतृतपनः शठश्चैव महासुरः।
गविष्ठश्च वनायुश्च दीर्घजिह्मश्च दानवः ॥22

असंख्येयाः स्मृतास्तेषां पुत्रपौत्राश्च भारत।
सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कमर्दनम्॥23

सुचन्द्रं चन्द्रहर्तारं तथा चनद्रप्रमर्दनम्।
कृरस्वभावं कृरायाः पुत्रपौत्रमनन्तकम् ॥24

गणःक्रोधवशो नाम क्रूरकर्मारिमर्दनः
दनायुषःपुनः। पुत्राश्चत्वारोऽसुरपुङ्गवाः॥ 25

विक्षरो बलवीरौ च वृत्रश्चैव महासुरः।
कालायाःप्रथिताःपुत्राः कालकल्पाःप्रहारिणः॥ 26

प्रविख्याता महावीर्या दानवेषु परंतपाः।
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च॥ 27

क्रोधशतृस्तथैवान्ये कालकेया इति श्रुताः।
असुराणामुपाध्यायः शुक्रस्त्वृषिसुतोऽभवत् ॥28

ख्याताश्चोशनसःपुत्राश्चत्वारोऽसुरयाजकाः।
त्वष्टाधरस्तथात्रिश्च द्वावन्यौ रौद्रकर्मिणौ॥29

तेजसा सूर्यसंकाशा ब्रह्मलोकपरायणाः।
इत्येष वंशप्रभवः कथितस्ते तरस्विनाम्॥ 30

असुराणां सुराणां च पुराणे संश्रुतो मया।
एतेषां यदपत्यं तु न शक्यं तदेशषतः॥ 31

प्रसंख्यातुं महीपाल गुणभूतमनन्तकम्।
तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ॥ 32

आरुणिर्वारुणिश्चैव वैनतेयाःप्रकीर्तिताः।
शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ॥33

कूर्मश्च कुलिकश्चैव काद्रवेयाःप्रकीर्तिताः।
भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ॥34

गोपतिर्धृतराष्ट्रश्च सूर्यवर्चाश्च सप्तमः।
सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः॥ 35

भीमश्चित्ररथश्चैव विख्यातःसर्वविद्वशी ।
तथा शालिशिरा राजन् पर्जन्यश्च चतुर्दश ॥36

कलिःपञ्चदशस्तेषां नारदश्चैव षोडशः ।
इत्येते देवगन्धर्वाः मौनेयाःपरिकीर्तिताः॥ 37

अथ प्रभूतान्यन्यानि कीर्तयिष्यामि भारत।
अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्॥ 38

अरूपां सुभगां भासीमिति प्राथा व्यजायत।
सिद्धःपूर्णश्च बर्हिश्च पूर्णायुश्च महायशाः॥ 39

ब्रह्मचारी रतिगुणः सुपर्णश्चैव सप्तमः।
विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा॥ 40

इत्येते देवगन्धर्वाः प्राथेयाः परिकीर्तिताः।
इमं त्वप्सरसां वंशं विदितं पुण्यलक्षणम्॥ 41

प्राधासूत महाभागा देवी देवर्षितःपुरा।
अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा॥ 42

अरुणा रक्षिताचैव रम्भा तद्वन्मनोरमा।
केशिनी च सुबाहुश्च सुरता सुरजा तथा ॥43

सुप्रिया चातिबाहुश्च विख्यातौ च हाहा हूहूः।
तुम्बुरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः ॥44

अमृतं ब्राह्मणा गावो गन्धर्वाप्सरसस्तथा।
अपत्यं कपिलायाश्च पुराणे परिकीर्तितम्॥ 45

इति ते सर्वभूतानां सम्भवःकथितो मया।
यथावत्संपरिख्यातो गन्धर्वाप्सरसां तथा॥ 46

भुजङ्गानां सुपर्णानां रुद्राणां मरुतां तथा ।
गवां च ब्राह्मणानां च श्रीमतां पुण्यकर्मणाम्॥47

आयुष्यश्चैव पुण्यश्च धन्यः श्रुतिसुखावहः।
श्रोतव्यश्चैव सततं श्राव्यश्चैवानसूयता॥ 48

इमं तु वंशं नियमेन यःपठेत्
महात्मनां ब्राह्मणदेवसन्निधौ।
अपत्यलाभं स लभते च पुष्कलं
श्रियं यशः प्रेत्य च शोभनां गतिम्॥ 49

--- स्वस्ति---